योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः १६

षोडशः सर्गः १६

श्रीवसिष्ठ उवाच ।

विशेषेण महाबुद्धे संसारोत्तरणे नृणाम् ।

सर्वत्रोपकरोतीह साधुः साधुसमागमः ।। १

साधुसङ्गतरोर्जातं विवेककुसुमं सितम् ।

रक्षन्ति ये महात्मानो, भाजनं ते फलश्रियः ।। २

शून्यमाकीर्णतामेति मृतिरप्युत्सवायते ।

आपत्संपदिवाभाति विद्वज्जनसमागमे ।। ३

हिममापत्सरोजिन्या मोहनीहारमारुतः ।

जयत्येको जगत्यस्मिन्साधुः साधुसमागमः ।। ४

परं विवर्धनं बुद्धेरज्ञानतरुशातनम् ।

समुत्सारणमाधीनां विद्धि साधुसमागमम् ।। ५

विवेकः परमो दीपो जायते साधुसंगमात् ।

मनोहरोज्ज्वलो नूनमासेकादिव गुच्छकः ।। ६

निरपायां निराबाधां निर्वृतिं नित्यपीवरीम् ।

अनुत्तमां प्रयच्छन्ति साधुसङ्गविभूतयः ।। ७

अपि कष्टतरां प्राप्तैर्दशां विवशतां गतैः ।

मनागपि न संत्याज्या मानवैः साधुसंगतिः ।। ८

साधुसंगतयो लोके सन्मार्गस्य च दीपिकाः ।

हार्दान्धकारहारिण्यो भासो ज्ञानविवस्वतः ।। ९

यः स्नातः शीतसितया साधुसंगतिगङ्गया ।

किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।। १०

नीरागाश्छिन्नसंदेहा गलितग्रन्थयोऽनघ ।

साधवो यदि विद्यन्ते किं तपस्तीर्थसंग्रहैः ।। ११

विश्रान्तमनसो धन्याः प्रयत्नेन परेण हि ।

दरिद्रेणेव मणयः प्रेक्षणीया हि साधवः ।। १२

सत्समागमसौन्दर्यशालिनी धीमतां मतिः ।

कमलेवाप्सरोवृन्दे सर्वदैव विराजते ।। १३

तेनामलविचारस्य पदस्याग्रावचूलिता ।

प्रथिता येन धन्येन न त्यक्ता साधुसंगतिः ।। १४

विच्छिन्नग्रन्थयस्तज्ज्ञाः साधवः सर्वसंमताः ।

सर्वोपायेन संसेव्यास्ते ह्युपाया भवाम्बुधौ ।। १५

ते एते नरकाग्नीनां संशुष्केन्धनतां गताः ।

यैर्दृष्टा हेलया सन्तो नरकानलवारिदाः ।। १६

दारिद्र्यं मरणं दुःखमित्यादिविषयो भ्रमः ।

संप्रशाम्यत्यशेषेण साधुसंगमभेषजैः ।। १७

संतोषः साधुसङ्गश्च विचारोऽथ शमस्तथा ।

एत एव भवाम्भोधावुपायास्तरणे नृणाम् ।। १८

संतोषः परमो लाभः सत्सङ्गः परमा गतिः ।

विचारः परमं ज्ञानं शमो हि परमं सुखम् ।। १९

चत्वार एते विमला उपाया भवभेदने ।

यैरभ्यस्तास्त उत्तीर्णा मोहवारिभवार्णवात् ।। २०

एकस्मिन्नेव वै तेषामभ्यस्ते विमलोदये ।

चत्वारोऽपि किलाभ्यस्ता भवन्ति सुधियां वर ।। २१

एकोऽप्येकोऽपि सर्वेषामेषां प्रसवभूरिह ।

सर्वसंसिद्धये तस्मात्यत्नेनैकं समाश्रयेत् ।। २२

सत्समागमसंतोषविचाराः सुविचारितम् ।

प्रवर्तन्ते शमस्वच्छे वाहनानीव सागरे ।। २३

विचारसंतोषशमसत्समागमशालिनि ।

प्रवर्तन्ते श्रियो जन्तौ कल्पवृक्षाश्रिते यथा ।। २४

विचारशमसत्सङ्गसंतोषवति मानवे ।

प्रवर्तन्ते प्रपूर्णेन्दौ सौन्दर्याद्या गुणा इव ।। २५

सत्सङ्गसंतोषशमविचारवति सन्मतौ ।

प्रवर्तन्ते मन्त्रिवरे राजनीव जयश्रियः ।। २६

तस्मादेकतमं नित्यमेतेषां रघुनन्दन ।

पौरुषेण मनो जित्वा यत्नेनाभ्याहरेद्गुणम् ।। २७

परं पौरुषमाश्रित्य जित्वा चित्तमतङ्गजम् ।

यावदेको गुणो नान्तस्तावन्नास्त्युत्तमा गतिः ।। २८

पौरुषेण प्रयत्नेन दन्तैर्दन्तान्विचूर्णयेत् ।

यावन्नाभिनिविष्टं ते मनो राम गुणार्जने ।। २९

देवो भवाथ यक्षो वा पुरुषः पादपोऽथ वा ।

तावत्तव महाबाहो नोपायोऽस्तीह कश्चन ।। ३०

एकस्मिन्नेव फलदे गुणे बलमुपागते ।

क्षीयन्ते सर्व एवाशु दोषा विवशचेतसः ।। ३१

गुणे विवृद्धे वर्धन्ते गुणा दोषजयप्रदाः ।

दोषे विवृद्धे वर्धन्ते दोषा गुणविनाशनाः ।। ३२

मनोमोहवने ह्यस्मिन्वेगिनी वासनासरित् ।

शुभाशुभबृहत्कूला नित्यं वहति जन्तुषु ।। ३३

सा हि स्वेन प्रयत्नेन यस्मिन्नेव निपात्यते ।

कूले तेनैव वहति यथेच्छसि तथा कुरु ।। ३४

पुरुषयत्नजवेन मनोवने

शुभतटानुगतां क्रमशः कुरु ।

वरमते निजभावमहानदी-

महह तेन मनागपि नोह्यसे ।। ३५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे सदाचारनिरूपणं नाम षोडशः सर्गः ।। १६ ।।